**रक्तधातु** पुं० कर्म० । गैरिके त्रिका० । २ताम्रे च राजनि० देहस्थे रुधिररूपे रसधातुजाते मांसधातुहेतौ ३धातुभेदे च अहङ्कारशब्दे ५५६ पृ० दृश्यम् ।

**रक्तनाल** पुं० रक्तो नालोऽस्य । जीवशाके राजनि० ।

**रक्तप** पुंस्त्री० रक्तं पिबति पा-क । १राक्षसे मेदि० । स्त्रियां ङीष् । २रक्तपानकर्त्तरि त्रि० । ३जलौकायां ४डाकिन्याञ्च स्त्री मेदि० टाप् ।

**रक्तपत्रिका** स्त्री रक्तानि पत्राण्यस्याः कप् अत इत्त्वम् । १नाकुल्यां २रक्तपुनर्नवायाञ्च राजनि० ।

**रक्तपल्लव** पुं० ६ब० । १अशोकवृक्षे राजनि० । कर्म०। २रक्तवर्णपल्लवे अस्त्री० । [राजनि०।

**रक्तपाकी** स्त्री रक्तः पाकः फलं यस्याः ङीप् । वृहत्याम्

**रक्तपाद** पुं० ६त० । १शुकपक्षिणि हेमच० । २लज्जालुलतायां ३हंसपद्याञ्च स्त्री राजनि० ङीप् पद्भावश्च ।

**रक्तपायिनी** स्त्री रक्तं पातुं शीलमस्याः पा+णिनि ङीप् । जलौकायाम् (जोँक) राजनि० ।

**रक्तपारद** न० कर्म०। हिङ्गुले हारा० । तदर्थे पुं० जटा० ।

**रक्तपित्त** न० रोगभेदे । तल्लक्षणादिकं भावप्र० उक्तं यथा “घर्मव्यायामशोकाध्वव्यवायैरतिसेवितैः । तीक्ष्णोष्णक्षारलवणैरम्लैः कटुभिरेव च । पित्तं विदग्धं स्वगुणैर्विदहत्याशु शोणितम्” । तीक्ष्णं मरिचादि । उष्णमग्नितापादि । क्षारोयवक्षारादिः । विदग्धं स्वगुणैः स्वकारणैः गुणैस्तीक्ष्णादिभिः । गुणैरिति बहुत्वेन तीक्ष्णाम्ललवणकटूष्णधर्मादयो गृह्यन्ते विदहति दूषयति । अथ रक्तपित्तस्य सामान्यं लक्षणमाह “ततः प्रवर्त्तते रक्तमूर्द्ध्वञ्चाधो द्विधाऽपि वा” । अत्र रक्तमित्युपलक्षणम् । तेन संसृष्टं पित्तञ्च । अतएव रक्तञ्च पित्तञ्च रक्तपित्तमिति द्वन्द्व इति सुश्रुतः । रक्तञ्च तत् पित्तं चेति रक्तपित्तं रागप्राप्तं पित्तं रक्तमित्युच्यते रक्तं पित्तं कर्मधारयश्च इति चरकः । उभयत्रापि न दोषः कारणत्रयात् । कारणत्रयमाह “संयोगात् दूषणात् तत्तु सामान्यात् गन्धवर्णयोः । रक्तस्य पित्तमाख्यातं रक्तपित्तं मनीषिभिः” । मार्गानाह “ऊर्ध्वं नासाक्षिकर्णास्यैर्मेढ्योनिगुदैरधः । कुपितं रोमकूपैश्च समस्तैस्तत् प्रवर्त्तते” । कुपितं पित्तम् । पूर्वरूपमाह “सदनं शीतकामित्वं कण्ठधूमायनं वमिः । लोहगन्धिश्च निश्वासो भवत्यस्मिन् भविष्यति” । “विशिष्टरूपमाह “सान्द्रं सपाण्डु सस्नेहं पिच्छिलं च कफान्वितम्” । वातिकमाह “श्यावारुणं सफेनञ्च तनु रूक्षञ्च वातिकम्” । पैत्तिकमाह “रक्तपित्तं कषायाभं कृष्णं गोमूत्रसन्निभम् । मेचकागारधूमाभमञ्जनाभञ्च पैत्तिकम्” । मेचकम् चिक्कणं कृष्णवर्णम् । अञ्जनं स्रोतोऽञ्जनं तदाभम् । संसर्गविशेषेण मार्गभेदमाह” “संसृष्टं लिङ्गसंसर्गात् त्रिलिङ्गं सान्निपातिकम् । ऊर्ध्वगं कफसंसृष्टमधोगं मारुतानुगम् । द्विमार्गं कफवाताभ्यामुभाभ्यां तत् प्रवर्त्तते” । उपद्रवानाह “दौर्बल्यं श्वासकासज्वरवमथुमदाः पाण्डुतादाहमूर्च्छा भुक्ते घोरोविदाहस्त्वधृतिरपि सदा हृद्यतुल्या च पीड़ा । तृष्णा कोष्ठस्य भेदः शिरसि च तपनं पूयनिष्ठीवनञ्च द्वेषो भक्तेऽविपाको विकृतिरपि भवेद्रक्तपित्तोपसर्गाः” । विकृतिः मांसप्रक्षालनाभतादिः । साध्यादिकमाह “एकदोषानुगं साध्यं द्विदोषात् याप्यमुच्यते । यत्त्रिदोषमसाध्यं स्यान्मन्दाग्नेरतिवेगवत् । ऊर्द्ध्वं साध्यमधो याप्यमसाध्यं युगपद्गतम् । व्याधिभिः क्षीणदेहस्य वृद्धस्याऽनश्नतस्तु यत्” । अथ साध्यमाह “एकमार्गं बलवतो नातिवेगं नवोत्थितम् । रक्तपित्तं सुखे काले साध्यं स्यान्निरुपद्रवम्” । सुखे काले हिमशिशिरयोः । असाध्यमाह” “मांसप्रक्षालनाभं क्वथितमिव च यत्कर्द्दमाम्भोनिभं वा मेदःपूयास्रकल्पं यकृदिव यदि वा पक्वजम्बूफलाभम् । यत् कृष्णं यच्च नीलं भृशमपि कुणपं यत्र चोक्ता विकारास्तद्वर्ज्यं रक्तपित्तं सुरपतिधनुषा यच्च तुल्यं विभाति” । उक्ता विकारा दौर्बल्यादयः । सुरपतिधनुषा तुल्यं नानावर्णम् । “येन चोपहतो रक्तं रक्तपित्तेन मानवः । पश्येद्दृश्यं वियच्चापि तदसाध्यमसंशयम्” । येन रक्तपित्तेनोपहतः मनुष्यः दृश्यं घटपटादिकं रक्तं पश्यति स नश्यति वियच्चापि अदृश्यमपीत्यर्थः । अथारिष्टमाह । “लोहितं छर्द्दयेद्यस्तु बहुशो लोहितेक्षणः । लोहितोद्गारदर्शी च म्रियते रक्तपैत्तिकः” । लोहितोद्गारदर्शी व्याधिमहिम्नोद्गारमपि लोहितं पश्यतीत्यर्थः” ।

**रक्तपुष्प** न० कर्म० । १रक्ते कुसुमे रक्तं पुष्पमस्य । २करवीरे जटा० ३रोहितकवृक्षे ४रक्तकाञ्चनवृक्षे ५दाड़िमवृक्षे ६रक्तवकवृक्षे रत्नमा० ७बन्धूकवृक्षे ८पुन्नागवृक्षे च राजनि० ९शाल्मलीवृक्षे स्त्री जटा० टाप् । रक्तपुष्पक पलाशवृक्षे रोहितकवृक्षे च जटा० । पर्पटे शाल्मलिवृक्षे च राजनि०

**रक्तपुष्पिका** स्त्री रक्तानि पुष्पाणि यस्याः कप् अत इत्त्वम् । १लज्जालुलतायाम् शब्दच० २रक्तपुन-